श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

## श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये उत्तरकाण्डे

# ॥ एकोननवतितमः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ एकोननवतितमः सर्गः ॥

## इलाबुधयोः समागमः पुरूरवस उत्पत्तिश्च

श्रुत्वा किम्पुरुषोत्पत्तिं लक्ष्मणो भरतस्तथा।
आश्चर्यमिति चाब्रूतामुभौ रामं जनेश्वरम् ॥ **7.89.1** ॥

अथ रामः कथामेतां भूय एव महायशाः।
कथयामास धर्मात्मा प्रजापतिसुतस्य वै ॥ **7.89.2** ॥

सर्वास्ता विहृता दृष्ट्वा किन्नरीर्ऋषिसत्तमः।
उवाच रूपसम्पन्नां तां स्त्रियं प्रहसन्निव ॥ **7.89.3** ॥

सोमस्याहं सुदयितः सुतः सुरुचिरानने।
भजस्व मां वरारोहे भक्त्या स्निग्धेन चक्षुषा ॥ **7.89.4** ॥

तस्य तद् वचनं श्रुत्वा शून्ये स्वजनवर्जिते।
इला सुरुचिरप्रख्यं प्रत्युवाच महाप्रभम् ॥ **7.89.5** ॥

अहं कामचरी सौम्य तवास्मि वशवर्तिनी।
प्रशाधि मां सोमसुत यथेच्छसि तथा कुरु ॥ **7.89.6** ॥

तस्यास्तदद्भुतप्रख्यं श्रुत्वा हर्षमुपागतः।
स वै कामी सह तया रेमे चन्द्रमसः सुतः ॥ **7.89.7** ॥

बुधस्य माधवो मासस्तामिलां रुचिराननाम्।
गतो रमयतोऽत्यर्थं क्षणवत् तस्य कामिनः॥ **7.89.8** ॥

अथ मासे तु सम्पूर्णे पूर्णेन्दुसदृशाननः।
प्रजापतिसुतः श्रीमाञ्शयने प्रत्यबुध्यत॥ **7.89.9** ॥

सोऽपश्यत् सोमजं तत्र तपन्तं सलिलाशये।
ऊर्ध्वबाहुं निरालम्बं तं राजा प्रत्यभाषत॥ **7.89.10** ॥

भगवन् पर्वतं दुर्गं प्रविष्टोऽस्मि सहानुगः।
न च पश्यामि तत् सैन्यं क्व नु ते मामका गताः॥ **7.89.11** ॥

तच्छ्रुत्वा तस्य राजर्षेर्नष्टसंज्ञस्य भाषितम्।
प्रत्युवाच शुभं वाक्यं सान्त्वयन् परया गिरा॥ **7.89.12** ॥

अश्मवर्षेण महता भृत्यास्ते विनिपातिताः।
त्वं चाश्रमपदे सुप्तो वातवर्षभयार्दितः॥ **7.89.13** ॥

समाश्वसिहि भद्रं ते निर्भयो विगतज्वरः।
फलमूलाशनो वीर निवसेह यथासुखम्॥ **7.89.14** ॥

स राजा तेन वाक्येन प्रत्याश्वस्तो महामतिः।
प्रत्युवाच ततो वाक्यं दीनो भृत्यजनक्षयात्॥ **7.89.15** ॥

त्यक्ष्याम्यहं स्वकं राज्यं नाहं भृत्यैर्विनाकृतः।
वर्तयेयं क्षणं ब्रह्मन् समनुज्ञातुमर्हसि॥ **7.89.16** ॥

सुतो धर्मपरो ब्रह्मन् ज्येष्ठो मम महायशाः।
शशबिन्दुरिति ख्यातः स मे राज्यं प्रपत्स्यते॥ **7.89.17** ॥

नहि शक्ष्याम्यहं हित्वा भृत्यदारान् सुखान्वितान्।
प्रतिवक्तुं महातेजः किञ्चिदप्यशुभं वचः॥ **7.89.18** ॥

तथा ब्रुवति राजेन्द्रे बुधः परममद्भुतम्।
सान्त्वपूर्वमथोवाच वासस्त इह रोचताम्॥ **7.89.19** ॥

न सन्तापस्त्वया कार्यः कार्दमेय महाबल।
संवत्सरोषितस्येह कारयिष्यामि ते हितम्॥ **7.89.20** ॥

तस्य तद् वचनं श्रुत्वा बुधस्याक्लिष्टकर्मणः।
वासाय विदधे बुद्धिं यदुक्तं ब्रह्मवादिना॥ **7.89.21** ॥

मासं स स्त्री तदा भूत्वा रमयत्यनिशं सदा।
मासं पुरुषभावेन धर्मबुद्धिं चकार सः॥ **7.89.22** ॥

ततः सा नवमे मासि इला सोमसुतात् सुतम्।
जनयामास सुश्रोणी पुरूरवसमूर्जितम्॥ **7.89.23** ॥

जातमात्रे तु सुश्रोणी पितुर्हस्ते न्यवेशयत्।
बुधस्य समवर्णं च इला पुत्रं महाबलम्॥ **7.89.24** ॥

बुधस्तु पुरुषीभूतं स वै संवत्सरान्तरम्।
कथाभी रमयामास धर्मयुक्ताभिरात्मवान्॥ **7.89.25** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे एकोननवतितमः सर्गः॥